पतम् । दृद्धाङ्गुलौ । "अम्बाम्बेति" सूत्रे अङ्गु शब्दप्रयोगात् अङ्गु शब्दः ह्रस्ववाचीतिज्ञापितम् । "अङ्गुष्ठोदरमध्ये तु यवो यस्य विराजते" इति सामु० ।

**अङ्गुष्ठमात्र** त्रि० अङ्गुष्ठ+परिमाणार्थे मात्रच् । अङ्गुष्ठमध्यपर्वपरिमिते । "अङ्गुष्ठमात्रोऽह्रवरोऽपि दृष्ट" इति श्रुतिः । "अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष बलाद्यमः" इति भारतम् । "अङ्गुष्ठाङ्गुलमानन्तु यत्र यत्रोपदिश्यते । तत्र तत्र दृहत्पर्वग्रन्थिभिर्मिनुयात् सदेति" कात्या० ।

**अङ्गुष** पु० अगि-उषन् । नकुले वाणे च ।

**अङ्गस्** न० अङ्गते नरकमनेन अघि-गतौ असुन् । पापे "युष्मच्छासनलङ्घनाङ्घसि मया मग्नेन नाम स्थितमिति" वेणी० ।

**अङ्गारि** पु० ऋ-इण् इत०प्र० । दीप्तिशीले । "कविरसि "अङ्गारिरसीति" यजु० । "अङ्गारिर्दीप्तिशील इति" वेददीपः ।

**अङ्घि** पु० अघिगतौ-इन् । पादे, दृक्षमूले च ।

**अङ्घ्रि** पु० अघि-गतौ करणे क्रिन् । चरणे, दृक्षमूले, "अधारि पद्मेषु तदङ्घ्रिणा घृणेति नै० ।अङ्घ्रिपः (पादपः) छन्दसां चतुर्थभागे च । "प्रथमाङ्घ्रिसमोयस्येति" वृत्त० ।

**अङ्घ्रिप** पु० अङ्घ्रिणा मूलेन पिबति सिक्तजलम् पा-क इत० । दृक्षमात्रे ।

**अङ्घ्रिपर्णिका** स्त्री अङ्घ्रौ मूले तदारभ्य वा पर्णमस्याः जातौ ङीप् स्वार्थे कन् । सिंहपुच्छाकारपुष्पवति (चाकुलिया) इति ख्याते दृक्षे । काभावे अङ्घ्रिपर्णीत्यपि तत्रैव ।

**अङ्घ्रिवल्लिका** स्त्री अङ्घ्रेरारभ्य वल्लीव पर्णवत्त्वेन, ततः स्वार्थे के ह्रस्वे टाप् । सिंहपुच्छाकारपुष्पवति (चाकुलिया) इति प्रसिद्धे दृक्षे । काभावे ॥ अङ्घ्रिवल्लीत्यपि तत्रैव ।

**अच** अविस्पष्टकथने गतौ च उभय० भ्वादि० सक० सेट् क्त्वा वेट् । अचति ते । आचीत् आचिष्ट । क्त अक्तः क्त्वा अचित्वा-अक्त्वा "स्वाहायज्ञमित्यञ्जली अचते" इति कात्या० । "अचते सङ्कोचयति" इति वेददीपः ।

**अच(अनचु)** गतौ पूजायाञ्च प० सक० सेट् । तत्र अच इदित् ओदिच्च (अनचु) अव्यक्तशब्दे च । अञ्चति आञ्चीत् अनचु-गतौ अच्यात् पूजायामञ्च्यात् । क्त अक्तः पूजायामुभयोः अञ्चितः अचि-वर्त्तमाने क्त अञ्चितः । अनचु-क्त्वा अञ्चित्वा-अक्त्वा अचि-अञ्चित्वा ।"अयमञ्चति पञ्चशरानुचर" इति सा० टी० । प्र+प्रकर्षे पूर्व्वदिक्कालवृत्तौ च प्राञ्चति प्राङ्(पूर्व्वकालः) प्राची (पूर्व्वा दिक्) परा+प्रतिगतौ, आभिमुख्याभावे, पश्चाद्भावे, वहिर्भावे च पराञ्चति (परागच्छति) पराङ् (वाह्यः) । अप+अपसरणे अपाञ्चति । सम्+सुन्दरगमने, यथोचितगमने च समञ्चति सम्यङ् । अनु+पश्चाद्गतौ । अन्वञ्चति अन्वङ् । उद्+ऊर्द्धगमने, उत्तरदिग्वृत्तौ च उदञ्चति (उद्गच्छति) "उदञ्चद्रोमाञ्चमिति" उदङ् देशः उदीची (उत्तरा दिक्) । परि+समन्ताद्गतौ । पर्य्यञ्चति । प्रति+प्रतीपगतौ, पश्चाद्गतौ, पश्चाद्वर्त्तित्वे च प्रत्यञ्चति (प्रतीपं गच्छति) । प्रत्यङ्, प्रतीची (पश्चिमा दिक्) । आत्मनि व्याप्त्यर्थकप्रतिना योगात् प्रत्यक्शब्दः तस्य सर्व्वविषयव्यापकत्वात् प्रत्यक्त्वम् । नि+न्यूनीभावे न्यञ्चति न्यङ् न्यग्भावः न्यक्कारः । अव+अधोगतौ, दक्षिणदिग्वृत्तौ च । अवाञ्चति अवाङ् (अधोमुखः) अवाची (दक्षिणा दिक्) यथा च उत्तरदक्षिणयोः ऊर्द्धाधोभावस्तथा अवाक्शब्दे वक्ष्यते ।

**अच** गतौ पूजायाम् इदित् उभ० सक० सेठ् क्त्वा वेट् । अञ्चति ते आञ्चीत् आञ्चिष्ट । क्त्वा अङ्क्त्वा-अञ्चित्वा । उपसर्गात् अनुचवत् । "न्यञ्चते प्रत्यहं मोहो यस्मान्नप्रञ्चन्ति चारव" इति कविर० ।

**अचक्षुस्** त्रि० न०ब० । मन्दनेत्रे, नेत्रहीने च । "सचक्षुरचक्षुरिव सकर्णोऽकर्ण इवेति" श्रुतिः । न०त० । चक्षुर्भिन्ने न० ।

**अचतुर** त्रि० न सन्ति चत्वारि यत्र नि० अच्समा० । चतुःसंख्याशून्ये । चतुरोनिपुणः न०त० । दक्षभिन्ने अपटौ त्रि० ।

**अचपल** त्रि० न चपलः । चापल्यविरोधिस्थैर्य्ययुक्ते ।

**अचर** त्रि० न चरति चलति-चर-अच् न० त० । चरत्वविरोधिस्थैर्य्यवति स्थावरे स्थितिशीले पृथिव्यादौ "चराणामन्नमचरमिति" मनुः । चलनशून्ये त्रि० । ज्योतिषोक्ते मेषकर्कटतुलामकरराशिरूपचरराशिभिन्नेषु स्थिरराशिषु दृषसिंहदृश्चिककुम्भराशिषु न० ।

**अचरम** त्रि० न०त० । अन्तिमत्वविरोधिमध्यत्वाद्यवस्थावति "वयस्यचरमे" इति पा० । अचरमं वयः कौमारादि ।

**अचल** पु० न चलः ।। (गों'ज)इति ख्याते शङ्कौ । पर्व्वते, "अचलाः सागराः ग्रामाः प्रासादधवला गृहाः धारितं च त्वया सर्वमिति" पृथिवीप्रार्थनामन्त्रः ।"अचलएष भवानिव राजते" इति माघः । पृथिव्यां स्त्री । भूमेरचलत्वादिकमुक्तं सि०शि०गो० "भूमेः पिण्डः शशाङ्कज्ञकविरविकुजेज्यार्किनक्षत्रकक्षावृत्तैर्वृत्तो वृतः सन् मृद-